122

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

द्वितीयं

तारातन्त्रम् ।

उन्नरानगुरुवंश्यपण्डितश्रीरघुवंश-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारः १८६७ वार्षिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

शाक्तप्रमोदान्तर्गतं

द्वितीयं

तारातन्त्रम् ।

तृतीयावृत्तिः

श्रीगणेशाय नमः ॥

अथ शाक्तप्रमोदः ।

तारातन्त्रम् ॥


अथ ताराध्यानम् ॥

प्रत्यालीढपदार्प्पिताङ्घ्रिशवहृद्घोराट्टहासापराखड्गेन्दीवर कर्त्रिखर्प्परभुजाद्युङ्कारबीजोद्भवा ॥ खर्व्वा नीलविशालपिङ्ग लजटाजूटैकनागैर्य्युता जाड्यन्यस्यकपालकर्तृजगतां हन्त्यु ग्रतारास्वयम् ॥



अथ यन्त्रोद्धारः ॥

सयोनिश्चन्दनेनाष्टदलम्पद्मँल्लिखेत्ततः॥मृद्वासनंसमासाद्यमा याम्पूर्वदलेलिखेत् ॥ वीजन्द्वितीयंय्याम्येफट्उत्तरेपश्चिमेतुठम्॥ मध्येवीजँल्लिखेत्तारम्भूतशुद्धिमथाचरेत् ॥



अथ मन्त्रोद्धारः ॥

वाग्बीजम्प्रथमम्प्रोच्यओङ्कारन्तुतत ः पठेत् ॥ लज्जावीजन्त तस्तारावीजं हूँफट्तत ः पठेत् ॥

अथ मन्त्रः ॥

ऐंओंह्रींक्रींहूँफट् ॥

अथ तारासपर्य्यासरणिः ॥

कुशहस्तो मौनी मूलेनाचम्य, ' ॐवज्रोदकेहूँफट् ' इत्यने न जलङ्कृहीत्वा, ' ॐह्रींस्वाहा ' इत्यनेन पादौ प्रक्षाल्य, ' ॐ ह्रींस्वविशुद्धधर्म्मसर्व्वपापानि शमयाशेषविकल्पानपनय स्वा हा' इत्यनेनाचम्य, ' ॐमणिधरि वज्रिणि शिखरिणि सर्व्ववश ङ्करिहूँफट् ' इतिशिखाबन्धनङ्कृत्वा, ' ॐरक्षरक्षहूँफट्स्वाहा' इ तिभूमिं संशोध्य, ' ॐपवित्रवज्रम्मेहूँस्वाहा'इतिभूमिमभिमन्त्र्य 'ॐआसुरेश्वरि वज्ररेखे हूँस्वाहा' इत्यनेन भूमिंस्पृष्ट्वा, ' ॐ आधारशक्तिकमलासनायनमः' इतिसम्पूज्य, तत आसनंस्पृष्ट्वा

पृथ्वीत्यादिमन्त्रम्पठेत् ॥ ततःसर्व्वविघ्नानुत्सार्य्य ततः'ॐअपस र्प्पन्तु ते भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्त्तारस्ते नश्यन्तुशिवाज्ञया' इत्यनेनाक्षतप्रक्षेपेणसर्व्वविघ्नानुत्सारयेत् ॥ गन्धपुष्पाभ्यां करौ सम्मर्द्य, तत्पुष्पमैशान्यान्नाराचमुद्रयाप्र क्षिपेत्। तत्रमन्त्रः 'ॐते सर्व्वे विलयँय्यान्तु ये मां हिंसन्ति हिंस काः ॥ मृत्युरोगभयक्रोधा ूपतन्तुरिपुमस्तकेहूँफट्' ॥ ततस्सा मान्यार्घ्यस्थापनविधिः ॥ 'तत्र ॐआधारशक्तयेनमः' इत्यने नाधारशक्तिमभिमन्त्र्य, तत्रचतुरस्रँल्लिखित्वा, तदुपरि ॐह्रः सामान्यार्घ्यंस्थापयामिनमः' इतिसामान्यार्घ्यस्थापनङ्कृत्वा, तस्मिन्प्रणवेनजलन्निधाय, तत्र 'गङ्गेचयमुनेचैवगोदावरिसरस्व ति । नर्म्मदेसिन्धुकावेरिजलेऽस्मिन्सन्निधिङ्कुरु' इतिमूर्य्यम ण्डलादङ्कुशमुद्रयातीर्थानितत्रावाह्य, पुष्पाक्षतः 'गङ्गादिसक लतीर्थेभ्यो नम, इतितत्रसम्पूज्य 'हृदयादिषडङ्गदेवताभ्योन म' इतिसम्पूज्य 'ॐआंअर्कमण्डलायद्वादशकलात्मनेनम' इ ति, ' ॐवह्निमण्डलायदशकलात्मनेनम' इति, 'ॐडंसोम मण्डलायषोडशकलात्मनेनम' इतिअर्कवह्निचन्द्रमण्डलानिस म्पूज्य, वमितिधेनुमुद्रयाऽमृतीकृत्य, हूमितिकवचेनावगुण्ठ्य फडित्यस्त्रेणसंरक्ष्य, तत्रप्रणवन्दशवारञ्जपेत्॥इतिसामान्यार्घ्य स्थापनविधिः ॥ सामान्यार्घ्यस्थजलेनात्मानम्पूजोपकरणानि चाभिषिच्य, ततो विशेषार्घ्यस्थापनविधिः ॥ तद्यथा ' ॐ आसुरेखे वज्ररेखे हूँस्वाहा " इति मण्डलँव्विरच्य, ततः नं वमितिभुवं सम्मृज्य, ॥ तत्र त्रिकोणवृत्तभूगृहात्मकम्मण्डलँ व्विधाय, तत्रआधारशक्तिङ्कूर्म्मशेषौ च सम्पूज्य, तत्राधारम् 'ह्रींफट्' इति मन्त्रेण संस्थाप्य, पूर्व्वोक्तवह्निमण्डलमन्त्रे णतत्तन्मण्डलमभ्यर्च्च्य, तत्रशङ्खम् 'हूंफट्' इतिमन्त्रेणप्रक्षा

लितं संस्थाप्य , मन्त्रचतुष्टयञ्जपञ्शङ्खमर्च्चयेत् ॥ तद्यथा 'ह्रांह्रींह्रूंकालीकपालायनमः , स्त्रांस्त्रींस्त्रूंतारिणीकपालायनमः, हांहींहूंनीलकपालायनमः, ह्रांस्त्रींहूंस्वर्ग्गकपालायसर्व्वाधाराय सर्व्वोद्भवाय सर्व्वशुद्धिमयायसर्व्वासुररुधिरारुणाय शुभ्राय सुराभाजनाय देवीकपालायनमः ' इतिमन्त्रचतुष्टयम् ॥ ततः पूर्व्वोक्तार्द्धमण्डलमन्त्रेण तन्मण्डलंसम्पूज्य, ततो मूलमन्त्रेण शङ्खे जलन्निधाय, स्वधाबुद्ध्या, तत्रगन्धपुष्पाक्षतान्क्षिपेत् ॥ तत्र त्रिखण्डाम्मुद्राम्प्रदर्श्य तत्रपूर्व्वोक्तचन्द्रमण्डलमन्त्रेण तन्मण्डलं सम्पूज्य, 'ऐंह्रींश्रींह्रौंओंह्रींत्रींहूँफट् ह्रौंहूँ इत्यनेनाष्टकृत्वो जलमभिमन्त्र्य, ह्रीमितिमन्त्रेण शङ्खमुद्रान्धेनुमुद्राँय्योनिमुद्रान्दर्शयित्वा, मत्स्यमुद्रया आच्छाद्य, दशवारम्मूलमन्त्रञ्जपेत् ॥ तत्रवृत्ताष्टदलषट्कोणन्ध्यात्वा, देवीम्प्रविचिन्त्य, सम्पूज्य, मूलेन चतुर्व्वारं सन्तर्प्पयेत्, 'ऐंह्रौंह्रौंनमआनन्दभैरवन्तर्प्पयामि' इतिमन्त्रेणसन्तर्प्पयेत्, तेनार्घ्यतोयेन पूजासाधनानि प्रोक्षयेत् ॥ इतिविशेषार्घ्यस्थापनविधिः ॥ 'ॐयथागतामिषेकममाग्निमेहूँफट्' इतिमन्त्रेण पुष्पं संशोध्य, 'ॐआँह्रींस्वाहा' इतिचित्तशोधनङ्कुर्य्यात् ॥ तत ऋष्यादिन्यासः ॥ तद्यथा—शिरसि वसिष्ठाय ऋषयेनमः ॥ मुखे अनुष्टुप्छन्दसेनमः ॥ हृदयेत्र्यम्बकदेवतायेनमः ॥ ततो हृदयादिन्यासः ॥ ह्रांहृदयायनमः । ह्रींशिरसेस्वाहा । ह्रूंशिखायैवषट् । ह्रैंकवचायहूम्॥ ह्रौंनेत्रत्रयायवौषट् । ह्रःअस्त्रायफट् ॥ ततः करन्यासः ॥ यथा ॥ ह्रांअङ्गुष्टाभ्यान्नमः । ह्रींतर्जनीभ्यांस्वाहा । ह्रूंमध्यमाभ्यां वषट् । ह्रैंअनामिकाभ्यांहूम्।ह्रौंकनिष्टाभ्यांवौषट् । ह्रःकरतलकरपृष्ठाभ्यांफट् ॥ ततो मूलेन त्रिधाव्यापकन्यासङ्कुर्य्यात् ॥ ततो मूलेन स्ववीजेन वा प्राणायामत्रयङ्कुर्य्यात् । तद्यथा च

तुर्व्वारजपेन पूरकः, षोडशवारजपेन कुम्भकः, अष्टवारजपेनरेचकः ॥ तद्विपरीतोद्वितीयः ॥ तद्विपरीतस्तृतीयः ॥ ततः षट्कोणाष्टदलभूपुरात्मकयन्त्रं विलिख्य, मध्येह्रौंबीजँव्विलिख्य यन्त्रसंस्कारञ्चकृत्वा ॥ तत्र मध्ये मेधाप्रज्ञाविद्याधीधृतिस्मृतिबुद्धिविद्यैश्वर्य्यः पूज्याः ॥ ततःपुष्पङ्गृहीत्वा 'ह्रौं सरस्वतीयोगपीठाय नमः इति यन्त्रमध्ये पुष्पम्प्रक्षिपेत् ॥ ततो देवीन्ध्यायेत् ॥ तद्यथा 'विश्वव्यापकवारिमध्यविलसच्छ्वेताम्बुजन्मास्थितां कर्त्रीखड्गकपालनीलनलिनै राजत्करामिन्दुभाम् ॥ काञ्चीकुण्डलहारकङ्कणलसत्केयूरमञ्जीरतामाद्यैर्न्नागवरैर्व्विभूषिततनूमारक्तनेत्रत्रयाम् ॥ १ ॥ पिङ्गोग्रैकजटाँल्लस त्स्वरसनान्दंष्ट्राकरालाननाञ्चर्म्म द्वैपिवरङ्कटौ विदधतीं श्वेतास्थिपट्टालिकाम् ॥ अक्षोभ्येण विराजमानशिरसं स्मेराननाम्भोरुहान्तारांशावहदासनान्दृढकुचामम्बान्त्रिलोक्याःस्मरेत् ॥ इतिध्यात्वाकरकक्षपिकाम्बद्धा तत्र पुष्पाक्षतङ्गृहीत्वा ॥ ततो मूलाधारात् कुण्डलिनीमुत्थाप्य, द्वितीयाम्मूर्त्तिन्निस्सार्य्य, तन्मुखे 'सोहम्' इति प्रदीपकलिकाजीवमूर्त्तिन्निःक्षिप्य तां सहस्रदलपद्मस्थब्रह्मणा सँयोज्य, चन्द्रमण्डलस्थामृतेन सन्तोष्य, कुण्डलिन्याजीवमूर्त्तिंव्वियोज्य, दक्षिणनासापुटेननिस्सृतम्पुष्पाक्षतँव्विभाव्य, तत्पुष्पाक्षतषट्कोणाष्टदलभूगृहात्मकयन्त्रे निःक्षिप्य, तत्र देवीमावाहयेत् ॥ तद्यथा 'महापद्मवनान्तस्थेकारणानन्दविग्रहे ॥ सर्व्वभूतहितेमातरेह्येहि परमेश्वरि ॥ इतिपठित्वा मूलञ्च पठन् 'अमुकदेविइहागच्छइहतिष्ठममपूजाङ्गृहाण' इह सन्निधेहि इहसन्निरुध्यस्व इहसम्मुखीभव' इति तत्तन्मुद्राःप्रदर्श्य, एषपुष्पाञ्जलिःमूलमन्त्रमुच्चार्य्य, अमुकदेविवज्रपुष्पम्प्रतीक्ष्यहूँफट्स्वाहा अमुकदेव्यैनमः' इतिपठन् पु

ष्पाञ्जलिपञ्चकङ्क्षिपेत् ॥ इदम्पाद्यम्मूलमन्त्रमुच्चार्य्य 'अमुकदेव्यै नमः'। इदमाचमनीयम् मूलमन्त्रमुच्चार्य्य 'अमुकदेव्यैनमः' इति पठित्वादद्यात् । एष मधुपर्कः मूलमन्त्रमुच्चार्य्य अमुकदेव्यैनम इतिपठित्वामधुपर्कन्दद्यात् । इदंस्नानीयम्मूलमन्त्रमुच्चार्य्यअमुकदेव्यैनमः इतिदेवींस्नापयेत् । एवंवसनभूषणेदद्यात् । इमानिपुष्पाणिमूलमन्त्रमुच्चार्य्य वज्रपुष्पम्प्रतीक्ष्यहूंफट्स्वाहा अमुकदेव्यैवौषट्इतिपठित्वापुष्पाणिदद्यात् । तत आवरणपूजा पूर्व्वंगणेशम्पूजयेत् ॥ तद्यथा गणेशइहागच्छइहतिष्टेत्यादिनापूजयेत् पुष्पदाने विशेषमनुः गंगणेशवज्रपुष्पम्प्रतीक्ष्यफट्स्वाहा' इत्यनेनपुष्पन्दद्यात् ।एवम्बटुकन्दक्षिणेपूजयेत् । एवङ्क्षेत्रपालम्पश्चिमेपूजयेत् । उत्तरेयोगिनीम्पूजयेत् । ततोदेव्यामस्तकेअक्षोभ्यम्पूजयेत् । 'अक्षोभ्यँव्वज्रपुष्पम्प्रतीक्ष्यस्वाहा'इतिमन्त्रेणाक्षोभ्यम्पूजयेत् । ततष्षट्कोणेषु षडङ्गम्पूजयेत् ॥ तद्यथा'एकजटायैनम'इतिहृदयाय 'तारिण्यैनम, इतिशिरसि'वज्रोदकायैनम' इतिशिखायाम् । उग्रतारायैनमइतिकवचे । 'महापरिशरायैनम' इतिनेत्रे'पिङ्गोग्रैकजटायैनम' इतिदिक्षुपूजयेत् ततोदिग्दलेषु 'वैरोचनमसिताभम्पद्मनाभंशङ्खपाण्डुरँव्वैरोचनवज्रपुष्पम्प्रतीक्ष्यस्वाहा'इत्यादिपुष्पदानेमन्त्रः । नामकम्मामकम्पाण्डुरन्तारकँविदिक्षु पूजयेत् । पुष्पदाने मन्त्रश्चप्राग्वत् । ततोभूगृहस्यचतुर्द्वारेषु पूर्व्वादितश्चपद्मान्तकजन्मान्तकविघ्नान्तकनरकान्तकान् पूजयेत् ॥ पुष्पदानेमन्त्रश्चप्राग्वत्ततस्तद्बाह्येइन्द्रादीन्दिक्पालान्पूजयेत् ॥ तद्बहिः वज्रशक्तिदण्डखड्गपाशाङ्कुशगदाशूलचक्राणिपूजयेत् ॥ ततोधूपः साङ्गायैसायुधायैसपरिवारायैसवाहनायैमूलम्अमुकदेवतायैनमः॥एवन्दीपन्दद्यात । ततोनैवेद्यन्दद्यात् । तद्यथास्वर्णादिभाजनेनैवेद्यम्परिवेष्य वायु

बीजन्द्वादशवारञ्जपन् तज्जातमरुतेन नैवेद्यं संशोध्य दक्षिण करतले वामकरतलं सन्यस्य तदुत्थेनाग्निना अग्निबीजन्द्वाद शवारञ्जपन्नखिलन्नैवेद्यदोषं सन्दह्य नर्व्वामकरपृष्ठे द क्षिणहस्तङ्कृत्वा तत्र प्रदर्श्य वंबीजन्द्वादशवारञ्जपन् त दुत्थयामृतधारयानैवेद्यमभिषिच्य, पुनर्म्मूलेनाभिषिच्यतत्स्पृ ष्ट्वाष्टशो मूलमन्त्रञ्जपेत् धेनुमुद्राम्प्रदर्श्य गन्धपुष्पैस्तद र्च्चयेत् ततोनैवेद्यभाजनँव्वामाङ्गुष्ठेनसंस्पृश्यदक्षिणहस्तेनजलन्धृ त्वामूलम्पठन् 'इदन्नैवेद्यंसाङ्गायैसायुधायैसपरिवारायैसवाहनायै सावरणायै अमुकदेव्यैनम' इतिनैवेद्यमुत्सृज्य अङ्गुष्ठानामिका भ्यान्नैवेद्यमुद्राम्प्रदर्श्य सपुष्पकराभ्यान्त्रिरुत्प्रोद्धरन् ग्रासमुद्राँ व्वामहस्तेन प्रदर्शयेत् ॥ ततरुप्राणादिमुद्रान्दर्शयेत् ॥ ओंप्रा णायस्वाहा इतिपठन्कनिष्ठानामिकाङ्गुष्ठैरुप्राणमुद्रान्दर्शयेत्। तत ओंअपानायस्वाहा इतिपठंस्तर्ज्जनीमध्यमाङ्गुष्ठैः अपानमुद्रा न्दर्शयेत्। तत ओंउदानायस्वाहा इतिपठन्ननामामध्यमाङ्गु ष्ठैरुदानमुद्रान्दर्शयेत्। ततओंव्यानायस्वाहा इतिपठन्तर्ज्जन्यना मामध्यमाङ्गुष्ठैर्व्यानमुद्रान्दर्शयेत् ततःओंसमानायस्वाहाइति पठन् सर्व्वाङ्गुलीभिस्समानमुद्राम्प्रदर्शयेत् ॥ ततोदेवींसन्तुष्टाँ व्विभाव्य पानीयन्दद्यात्। मूलमन्त्रमुच्चार्य्यइदम्पानीयममुकदे व्यैनमः। इदमाचमनीयममुकदेव्यैनमः।इदन्ताम्बूलञ्च एषपुष्पा ञ्जलिः ॥ अथजपविधिः ॥ पूर्व्ववत् ऋष्यादिन्यासकरन्यास षडङ्गन्यासान् ध्यानञ्च विधाय'ह्रींमालेमहामाले सर्व्वतत्त्वस्व रूपिणि ॥ चतुर्व्वर्ग्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव' इ तिपठन् मूलमन्त्रेण मालां सम्पूज्य यथाशक्ति जपङ्कुर्य्यात् ॥ जपान्ते पुनरुप्राणायामादिकाँव्विधाय देवीन्ध्यात्वा ॐगुह्या तिगुह्यगोप्त्रीत्वङ्गृहाणास्मत्कृतञ्जपम्। सिद्धिर्भवतुमेदेवित्वत्प्र

सादान्महेश्वरि' इतिपठन् तेजोमयञ्जलन्ध्यायन् देव्यावामह स्ते जपं समर्प्पयेत् ॥ पुष्पाञ्जल्यष्टकन्दत्त्वा स्तोत्रकवचादि कम्पठेत् । ततः प्रदक्षिणीकृत्य दण्डवत्प्रणिपत्य,ॐइतः पूर्व्वं प्राणवृद्धिदेहधर्म्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसावा चाहस्ताभ्याम्पद्भ्यामुदरेणशिश्ना यत्स्मृतँय्यदुक्तँय्यत्कृतन्त त्सर्व्वंब्रह्मार्प्पणम्भवतुस्वाहामदीयञ्चसकलन्देव्यैतेसमर्प्पयेत् ॥ ततः पुष्पाञ्जलिङ्गृहीत्वा'ॐमन्त्रहीनङ्क्रियाहीनँ विधिहीनंसु रेश्वरि ॥ यदर्च्चितम्मयादेवि परिपूर्णन्तदस्तुमे ॥ आवाहनञ्च पूजाञ्चतन्माहात्म्यञ्चपन्तथा ॥ विसर्ज्जनन्नजानामि श्रीदेवित्व ङ्क्षमस्वमे ॥ अज्ञानाद्विस्मृतेर्भ्रान्त्यायन्यूनमधिकङ्कृतम् ॥ विप रीतञ्चतत्सर्व्वंक्षमस्वपरमेश्वरि ॥' एषपुष्पाञ्जलिः अमुकदेव्यैन म इति क्षमाप्य, ततः ' ॐगच्छगच्छपरंस्थानंस्वस्थानम्परमे श्वरि । पूजाराधनकालेचपुनरागमनायच' इतिसंहारमुद्रया पुष्पमेकङ्गृहीत्वादेवींव्विसृज्य तत्पुष्पम् ऐशान्याम्पात्रान्तरेक्षि पेत् । तत्रपात्रेचण्डेश्वरींसमभ्यर्च्च्य 'ॐचण्डेश्वरि महादेवि नि र्म्माल्यैश्चन्दनादिभिः । लेह्यचोष्यान्नपानादि निर्म्माल्यं स्रग्वि लेपनम् ॥ निर्म्माल्यभोजनन्तुभ्यन्ददामि श्रीशिवाज्ञया' इद न्निर्म्माल्यं श्रीचण्डेश्वर्य्यैनम ' इतिपठन्निर्म्माल्याङ्क्षिपेत् ॥ ततः किञ्चिद्देवीनैवेद्यम् ' उच्छिष्टचाण्डाल्यैनम' इतिपठंस्तस्यै दद्यात् ॥ ततोनैवेद्यं स्वयम्भुञ्जीत ॥

॥ अथ तारास्तोत्रम् ॥

मातर्न्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे प्रत्यालीढप दास्थिते शवहृदि स्मेराननाम्भोरुहे ॥ फुल्लेन्दीवरलोचने त्रिनय ने कर्त्री कपालोत्पले खड्गञ्चादधती त्वमेव शरणन्त्वामीश्वरीमाश्र

१ लोचनत्रययुते इति वा पाठः ।

ये ॥१॥ वाचामीश्वरि भक्तकल्पलतिके सर्व्वार्त्थसिद्धीश्वरि गद्य प्राकृतपद्यजातरचनासर्व्वार्त्थसिद्धिप्रदे॥ नीलेन्दीवरलोचनत्रय युतेकारुण्यवारान्निधेसौभाग्यामृतवर्द्धनेनकृपयासिञ्चत्वमस्माद्दृशम् ॥ २ ॥ खर्व्वे गर्व्वसमूहपूरिततनौ सर्प्पादिवेषोज्ज्वले व्याघ्रत्वक्परिवीतसुन्दरकटिव्याधूतघण्टाङ्किते ॥ सद्यः कृत्तगलद्रजःपरिमिलन्मुण्डद्वयीमूर्द्धजग्रन्थिश्रेणिनृमुण्डदामललितेभीमे भयन्नाशय ॥ ३ ॥ मायानङ्गविकाररूपललना विन्द्रर्द्धचन्द्राम्बिके हूंफट्कारमयित्वमेवशरणम्मन्त्रात्मिके मादृशः॥ मूर्त्तिस्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मापरा वेदानान्न हिगोचरा कथमपि प्राज्ञैर्नुतामाश्रये ॥४॥ त्वत्पादाम्बुजसेवयासु कृतिनो गच्छन्तिसायुज्यतान्तस्याः श्रीपरमेश्वरत्रिनयनब्रह्मादिसाम्यात्मनः ॥ संसाराम्बुधिमज्जनेऽपटतनुर्देवेन्द्रमुख्यान्सुरान्मातस्त्वत्पदसेवने हि विमुखान् किम्मन्दधीस्सेवते ॥५॥ मातस्त्वत्पदपङ्कजद्वयरजोमुद्राङ्ककोटीरिणस्ते देवाजयसङ्गरे विजयिनो निःशङ्कमङ्के गताः ॥ देवोहम्भुवने न मे सम इतिस्पर्द्धांवहन्तःपरास्तत्तुल्यान्नियतंय्यथाशुचिरवी नाशंव्रजन्तिस्वयम् ॥ ६ ॥ त्वन्नामस्मरणात्पलायनपरा द्रष्टुञ्चशक्ता न ते भूतप्रेतपिशाचराक्षसगणा यक्षाश्चनागाधिपाः ॥ दैत्यादानवपुङ्गवाश्च खचरा व्याघ्रादिका जन्तवो डाकिन्यःकुपितान्तकश्चमनुजोमातःक्षणम्भूतले ॥ ७ ॥ लक्ष्मीः सिद्धिगणश्च पादुकमुखाःसिद्धास्तथावैरिणांस्तम्भश्चापिवराङ्गनेगजघटास्तम्भस्तथामोहनम् ॥ मातस्त्वत्पदसेवयाखलुनृणां सिध्यन्तितेतेगुणाःक्रान्तःकान्तमनोभवस्यभवति क्षुद्रोऽपि वाचस्पतिः ॥ ८ ॥ ताराष्टकमिद

१ सिद्धिप्रदे इति वा पाठः । २ सर्व्वार्त्थसिद्धिप्रदे इति वा पाठः । ३ वर्ष्मणेन इति वा पाठः । ४ इङ्किते इति वा पाठः ।

म्पुण्यम्भक्तिमान् यः पठेन्नरः ॥ प्रातर्म्मध्याह्नकाले च सायाह्ने नियतः शुचिः ॥ ९ ॥ लभतेकविताँव्विद्यां सर्व्वशास्त्रार्थविद्भवेत् ॥ लक्ष्मीमनश्वराम्प्राप्य भुक्त्वा भोगान्यथेप्सितान् ॥ १० ॥ कीर्त्तिङ्कान्तिञ्च नैरुज्यम्प्राप्यान्ते मोक्षमाप्नुयात् ॥ ११ ॥ इतिनीलतन्त्रेतारास्तोत्रंसमाप्तम् ॥

अथ तारकवचम् ।

ईश्वर उवाच ॥ कोटितन्त्रेषु गोप्या हि विद्यातिभयमोचिनी ॥ दिव्यं हि कवचन्तस्याः शृणुष्व सर्व्वकामदम् ॥ १ ॥ तारकवचस्याक्षोभ्यऋषिस्त्रिष्टुप्छन्दोभगवतीतारादेवता सर्व्वमन्त्रसिद्धयेविनियोगः ॥ ॐप्रणवो मे शिरःपातु ब्रह्मरूपा महेश्वरी ॥ ह्रींकारःपातु ललाटे वीजरूपा महेश्वरी ॥ २ ॥ स्त्रींकारःपातु वदने लज्जारूपा महेश्वरी ॥ हूँकारःपातु हृदये भवानी शक्तिरूपधृक् ॥ ३ ॥ फट्कारःपातु सर्व्वाङ्गे सर्व्वसिद्धिफलप्रदा ॥ खर्व्वा माम्पातु देवेशी भ्रूमध्ये सर्व्वसिद्धिदा ॥ ॥ ४ ॥ नीला माम्पातु देवेशी गण्डयुग्मे भयापहा ॥ लम्बोदरी सदा पातु कर्ण्णयुग्मम्भयापहा ॥ ५ ॥ व्याघ्रचर्म्मावृतकटिः पातुदेवी शिवप्रिया ॥ पीनोन्नतस्तनी पातु पार्श्वयुग्मे महेश्वरी ॥ ६ ॥ रक्तवर्त्तुलनेत्रा च कटिदेशे सदावतु ॥ ललज्जिह्वा सदा पातु नाभौमाम्भुवनेश्वरी ॥ ७ ॥ करालास्या सदा पातु लिङ्गे देवी हरप्रिया ॥ पिङ्गोग्रैकजटा पातु जङ्घायाँव्विघ्ननाशिनी ॥ ८ ॥ खड्गहस्ता महादेवी जानुचक्रे महेश्वरी ॥ नीलवर्ण्णा सदा पातु जानुनी सर्व्वदा मम ॥ ९ ॥ नागकुण्डलधर्त्री च पातुपादयुगे ततः ॥ नागहारधरादेवी सर्व्वाङ्गम्पातु सर्व्वदा ॥ १० ॥ नागाङ्गदधरा देवी पातु पाण्डवदेशतः ॥ च

तुर्भुजा सदा पातु गमने शत्रुनाशिनी ॥ ११ ॥ खड्गहस्ता म हादेवी पातु माँव्विजयप्रदा ॥ नीलाम्बरधरा देवी पातु माँ व्वि घ्ननाशिनी ॥ १२ ॥ कर्त्तृहस्ता सदा पातु विवादे शत्रुम ध्यतः ॥ ब्रह्मरूपधरा देवी सङ्ग्रामे पातु सर्व्वदा ॥ १३ ॥ ना गकङ्कणधर्त्रीच भोजने पातु सर्व्वदा॥ शवकर्ण्णामहादेवी शयने पातु सर्व्वदा ॥ १४ ॥ वीरासनधरा देवी निद्रायां पातु सर्व्व दा ॥ १५ ॥ धनुर्ब्बाणधरा देवी पातु माँव्विघ्नसङ्कले ॥ नागा श्वितकटिःपातु देवी मां सर्व्वकर्म्मसु ॥ १६ ॥ छिन्नमुण्डध रा देवी कानने सर्व्वदाऽवतु ॥ चितामध्यस्थिता देवी मारणे पातु सर्व्वदा ॥ १७ ॥ द्वीपिचर्म्मधरा देवी पुत्रदारधनादिषु ॥ अलङ्कारान्वितादेवी पातु मां हरवल्लभा ॥ १८ ॥ रक्षरक्ष नदीकुञ्जे हूँहूँहूँफट्समन्विते ॥ वीजरूपा महादेवी पर्व्वते पातु सर्व्वदा ॥ १९ ॥ मणिधरिवभ्रिणीदेवी महाप्रतिसरे तथा ॥ रक्ष रक्ष सदा हूँहूँ ॐह्रींस्वाहा महेश्वरी ॥ २० ॥ पुष्पकेतुरा जार्हते कानने पातु सर्व्वदा ॥ ॐवज्रपुष्पेहूँफट्च पाण्डवे पा तु सर्व्वदा ॥ २१ ॥ पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महे श्वरी ॥ ॐस्वाहाशक्तिसंयुक्ता दारान्रक्षतु सर्व्वदा ॥ २२ ॥ ॐपवित्रवज्रभूमे हूँफट्स्वाहासमन्विता ॥ पूरिका पातु मान्दे वीसर्व्वविघ्नविनाशिनी ॥ २३ ॥ आसुरेखे वज्ररेखे हूँफट्स्वा हासमन्विता ॥ पातालेपातुमान्देवी नागिनी मानसञ्चिता ॥ ॥ २४ ॥ ह्रींकारी पातु पूर्व्वे मां शक्तिरूपा महेश्वरी ॥ स्त्रींका री दक्षिणे पातु स्त्रीरूपा परमेश्वरी ॥ २५ ॥ हूँस्वरूपा महा माया पातु मां क्रोधरूपिणी ॥ कस्वरूपा महामायापाश्चिमे पातु सर्व्वदा ॥ २६ ॥ उत्तरे पातु मान्देवी ढस्वरूपा हरप्रिया ॥ म ध्ये माम्पातु देवेशी हूँस्वरूपा नगात्मजा ॥ २७ ॥ नीलवर्ण्णा

सदा पातु सर्व्वत्र वाग्भवी सदा ॥ तारिणी पातु भवने सर्व्वैश्व र्य्यप्रदायिनी ॥ २८ ॥ विद्यादानरता देवी पातु वक्त्रेसरस्वती॥ शास्त्रे वादे च सङ्ग्रामे जले च विषमेगिरौ ॥ २९ ॥ भीमरूपा सदा पातु श्मशाने भयनाशिनी ॥ भूतप्रेतालयेघोरे दुर्गे माम्भीषणावतु ॥ ३० ॥ पातु नित्यम्महेशानी सर्व्वत्र शिवदू तिका ॥ कवचस्य च माहात्म्यन्नाहंव्वर्ष्शतैरपि ॥ ३१ ॥ श क्नोमि कथितुन्देवि भवेत्तस्य फलन्तु यत् ॥ पुत्रदारेषु बन्धूनां सर्व्वदेशे च सर्व्वदा ॥ ३२ ॥ न विद्यते भयन्तस्य नृपपूज्यो भवेच्च सः ॥ शुचिर्भूत्वाऽशुचिर्व्वापिकवचं सर्वकामदम् ॥३३॥ प्रपठन्वास्मरन्मर्त्त्यो दुःखशोकविवर्जितः ॥ सर्व्वशास्त्रे महे शानिकविराड्भवति ध्रुवम् ॥ ३४ ॥ सर्व्ववागीश्वरो मर्त्त्यो लोकवश्यो धनेश्वरः ॥ रणे द्यूते विवादे च जयस्तस्य भवेद्ध्रुव म् ॥ ३५ ॥ पुत्रपौत्रान्वितो मर्त्त्योंविलासी सर्व्वयोषिताम् ॥ शत्रवो दासतां यान्ति सर्व्वेषां वल्लभः सदा ॥ ३६ ॥ गर्व्वी खर्व्वीभवत्येव वादी ज्वलति दर्शनात् ॥ मृत्युश्च वश्यताँ य्याति दासस्तस्यावनीश्वरः ॥ ३७ ॥ प्रसङ्गात्कथितं सर्व्व ङ्कवचं सर्व्वकामदम् ॥ प्रपठन्वास्मरन्मर्त्त्यः शापानुग्रहणे क्र मः ॥ ३८ ॥ आनन्दवृन्दसिन्धूनामधिप×कविराड्भवेत् ॥ स र्व्वयोगीश्वरो मर्त्त्यो लोकबन्धुस्सदासुखी ॥ ३९ ॥ गुरो×प्रसा दमासाद्य विद्याम्प्राप्य सुगोपिताम् ॥ तत्रापि कवचन्देवि दुर्ल्लभ म्भुवनेत्रये ॥ ४० ॥ गुरुर्देवो हरस्साक्षात् पत्नीतस्य हरप्रिया॥ अभेदेन यजेद्यस्तु तस्यसिद्धिरदूरतः ॥ ४१ ॥ मन्त्राचारा महेशानि कथिता×पूर्वत×प्रिये ॥ नाभौ ज्योतिस्तथावक्त्रे हृ दये परिचिन्तयेत् ॥ ४२ ॥ ऐश्वर्य्यं सुकवित्वञ्च रुद्रश्चसि द्धिदायकः॥तन्दृष्टा साधकन्देवि लज्जायुक्ता भवन्ति ते॥ ४३॥

स्वर्गे मर्त्ये च पाताले ये देवास्सुरसत्तमाः ॥ प्रशंसन्ति स दा सर्व्वे तन्दृष्ट्वा साधकोत्तमम् ॥ ४४ ॥ विघ्नात्मानश्चये देवाः स्वर्गे मर्त्ये रसातले ॥ प्रशंसन्ति सदा सर्व्वे तन्दृष्ट्वासाधको त्तमम् ॥ ४५ ॥ इति ते कथितन्देवि मया सम्यक्प्रकीर्त्तितम्॥ भुक्तिमुक्तिकरंसाक्षात् कल्पवृक्षस्वरूपकम् ॥ ४६ ॥ आसाद्या द्य गुरुम्प्रसाद्य य इदन्तल्पद्रुमालम्बनम्मोहेनापि मदेन वा न हिजनो जाडयेन वा मुह्यति ॥ सिद्धोऽसौ भुवि सर्व्वदुःखविपदा म्पारम्प्रयात्यन्तके मित्रन्तस्य नृपश्च देवि विपदो नश्यन्ति त स्याशु च ॥ ४७ ॥ तद्गात्रम्प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि वै भुवि ॥ तस्य गेहे स्थिरा लक्ष्मीर्व्वाणी वक्त्रे वसेद्ध्रुवम् ॥ ४८॥ इदङ्कवचमज्ञात्वा ताराय्यॅो भजते नरः ॥ अल्पायुर्न्निर्द्धनो मू खॅो भवत्येव न संशयः ॥ ४९ ॥ लिखित्वा धारयेद्यस्तु क ण्ठे वा मस्तके भुजे ॥ तस्य सर्व्वार्त्थसिद्धिःस्याद्यद्यन्मनसि वर्त्तते ॥ ५० ॥ गोरोचनाकुङ्कुमेन रक्तचन्दनकेन वा ॥ या वकैर्व्वा महेशानि लिखेन्मन्त्रँव्विशेषतः ॥ ५१ ॥ अष्टम्याम्म ङ्गलदिने चतुर्द्दश्यामथापि वा ॥ सन्ध्यायान्देवदेवेशि लिखेन्म न्त्रं समाहितः ॥ ५२ ॥ मघायां श्रवणायाँव्वा रेवत्याञ्च विशे षतः ॥ सिंहराशौ गते चन्द्रे कर्क्कटस्थे दिवाकरे ॥ ५३ ॥ मी नराशौ गुरौ याते वृश्चिकस्थे शनैश्चरे ॥ लिखित्वा धारयेद्यस्तु साधको भक्तिभावतः ॥ अचिरात्तस्यसिद्धिः स्यान्नात्र कार्य्या विचारणा ॥ ५४ ॥ वादीमूकति पोपकःस्तवयति क्षोणीपति र्दासति गर्व्वी खर्व्वति सर्व्वविच्च जडति वैश्वानरः शीतति ॥ आचाराद्भवसिद्धिरूपमपरं सिद्धो भवेदुर्ल्लभान्त्वाँव्वन्देभवभी तिभञ्जनकरीन्नीलाङ्गिरीशप्रियाम् ॥ ५५ ॥ इति नीलत न्त्रे परमरहस्यकमुग्रताराकवचं समाप्तम् ॥

॥ अथ श्रीताराहृदयम् ॥

श्रीशिव उवाच ॥ शृणु पार्व्वति भद्रन्ते लोकानां हितकारकम् ॥ कथ्यते सर्व्वदा गोप्यन्ताराहृदयमुत्तमम् ॥ १ ॥ श्रीपार्व्वत्युवाच ॥ स्तोत्रङ्कथं समुत्पन्नङ्कतङ्केन पुरा प्रभो ॥ कथ्यतां सर्व्वसङ्कृत्तङ्कपाङ्कृत्वा ममोपरि ॥ २ ॥ श्रीशिवउवाच ॥ रणे देवासुरे पूर्व्वङ्कृतमिन्द्रेण सुप्रिये ॥ दुष्टशत्रुविनाशार्त्थम्बलवृद्धियशस्करम् ॥ ३ ॥ ओमस्य श्रीमदुग्रताराहृदयस्तोत्रमन्त्रस्य श्रीभैरव ऋषिरनुष्टुप्छन्दः श्रीमदुग्रतारा देवता स्त्रींबीजं हूँशक्तिः नमः कीलकं सकलशत्रुविनाशार्थे पाठे विनियोगः ॥ ॐस्त्रींहृदयायनमः । ॐह्रींशिरसेस्वाहा । ॐहूँशिखायैवषट् । ॐत्रींकवचायहूम् । ॐऐंनेत्रत्रयायवौषट् । ॐहंसःअस्त्राय फट् ॥ अथ ध्यानम् ‘ ध्यायेत्कोटिदिवाकरद्युतिनिभान्वालेन्दुयुक्छेखरां रङ्काङ्गीं रसनां सुरक्तवसनाम्पूर्णेन्दुबिम्बाननाम् ॥ पाशाङ्कर्त्तृमहाङ्कुशादि दधतीन्दोर्भिश्चतुर्भिर्य्युतान्नानाभूषणभूषितान्भगवतीन्ताराञ्जगत्तारिणीम् ॥ एवन्ध्यात्वा शुभान्तारान्ततस्तुहृदयम्पठेत् ॥ तारिणीतत्त्वनिष्टानां सर्व्वतत्त्वप्रकाशिका ॥ रामाभिन्ना पराशक्तिश्शत्रुनाशङ्करोतु मे ॥ सर्व्वदा शत्रुसंरम्भे तारा मे कुरुताज्जयम् ॥ स्त्रींत्रींस्वरूपिणी देवी त्रिषु लोकेषु विश्रुता ॥ तव स्नेहान्मयाख्यातन्नपशूनम्प्रकाश्यताम् ॥ शृणु देवि तव स्नेहात्तारानामानि तत्त्वतः ॥ वर्ण्णयिष्यामि गुप्तानि दुर्ल्लभानि जगत्त्रये ॥ तारिणी तरला तारा त्रिरूपा तरणिप्रभा ॥ सत्त्वरूपा महासाध्वी सर्व्वसज्जनपालिका ॥ रमणीया रजोरूपा जगत्सृष्टिकरी परा ॥ तमोरूपा महामाया घोररावा भयानका ॥ कालरूपा कालिकाख्या जगद्विध्वंसकारिका ॥ तत्त्वज्ञानपरानन्दा तत्त्वज्ञानप्रदानघा ॥ रक्ताङ्गी

रक्तवस्त्रा च रक्तमालाप्रशोभिता ॥ सिद्धिलक्ष्मीश्चब्रह्माणी महा काली महालया ॥ नामान्येतानि येमर्त्त्यास्सर्व्वदैकाग्रमानसाः ॥ प्रपठन्ति प्रिये तेषाङ्किङ्करत्वङ्करोम्यहम् ॥ तारान्तारपरान्दे वीन्तारकेश्वरपूजिताम् ॥ तारिणीम्भवपाथोधेरुग्रताराम्भजाम्य हम् ॥ स्त्रींह्रींहूँत्रींफण्मन्त्रेणजलञ्चाऽभिषेचयेत् ॥ सर्व्वैरोगाः प्रणश्यन्ति सत्यं सत्यञ्चवदाम्यहम् ॥ त्रींस्वाहान्तैर्म्महामन्त्रैश्च न्दनं साधयेत्ततः॥तिलकङ्करुते प्राज्ञो लोको वश्यो भवेत्प्रि ये ॥ स्त्रींह्रींत्रींस्वाहामन्त्रेण श्मशानम्भस्म मन्त्रयेत् ॥ शत्रोर्ग्गृ हे प्रतिक्षिप्त्वा शत्रोर्म्मृत्युर्ब्भविष्यति ॥ ह्रींहूँस्त्रीम्फडन्तमन्त्रैः पुष्पंसंशोध्य सप्तधा ॥ उच्चाटनन्नयत्याशु रिपूणान्नैव संशयः ॥ स्त्रींत्रींह्रींमन्त्रवर्य्येण अक्षताश्चाभिमन्त्रिताः ॥ तत्प्रतिक्षेपमात्रेण शीघ्रमायाति मानिनी ॥ (हंसःओंह्रींस्त्रींहूंहूंसः) इतिमन्त्रेणजलेनशोधितङ्कुज्जलम्प्रिये ॥ तस्यैव तिलकंकृत्वा जगन्मोहं समाचरेत् ॥ ताराया हृदयन्देवि सर्व्वपापप्रणाशनम्॥वाजपेया दियज्ञानाङ्कोटिकोटिगुणोत्तरम् ॥ गङ्गादिसर्व्वतीर्त्थानाम्फल ङ्कोटिगुणं स्मृतम्॥महादुःखे महारोगे सङ्कटे प्राणसंशये ॥ महा भये महाघोरे पठेत्स्तोत्रम्महोत्तमम्॥सत्यं सत्यम्मयोक्तन्तेपार्व्व ति प्राणवल्लभे॥गोपनीयम्प्रयत्नेन न प्रकाश्यमिदङ्क्वचित्॥इति श्रीभैरवीतन्त्रेशिवपार्व्वतीसंवादेश्रीमदुग्रताराहृदयंसम्पूर्णम् ॥

अथ तारोपनिषत् ॥

ॐतत्सद्ब्रह्मतद्रूपम्प्रकृतिपरङ्गनाभन्तत्परम्परम्महत्सत्य न्तदहंह्रींकारं रक्तवर्णन्नात्राभिस्त्रींकाराम्पिङ्गलाभंहूङ्काराँव्विश दाभम्मद्धृदयरूपम् भूमण्डलम्फट्कारधूम्रवर्ण्णम्मतखड्गमों ङ्कारज्वलद्रूपम्मन्मस्तकँव्वेदा मद्धस्ताश्चन्द्रार्कानलामन्नेत्रा दि

वानक्तम्मत्पादौ सन्ध्या मत्कर्णौ सव्वंत्सरो मदुदरोमदंष्ट्रापङ्क्तौ मत्पार्श्वौ वारत्तवो मदङ्गुल्यो विद्यामन्नखाःपावकोमन्मुखम्महीं मद्रसना द्यौर्म्मन्मुखङ्गनम्मद्धृदयं भक्तिर्म्ममचर्म्म रसम्मद्रुधिरव्वांन्नव्वांसांसिफलानिनिरहङ्काराअस्थीनि सुधामन्मज्जास्थावराणिमद्रोमाणि पातालादिलोकौ मत्कुचौ ब्रह्मनादम्मन्नाढ्यं ज्ञानम्मन्मनः क्षमाबुद्धिः शून्यम्मदासनन्नक्षत्राणि मद्भूषणानि ॥ एतद्वैराटकम्मद्रपुः मज्जलं सत्त्वं बिन्दुस्वरूपम्महाकारस्वरूपज्योतिर्म्मयँ विद्धि शिरः उग्रताराम्महोग्रा नीलाङ्गनामेकजटाम्महामायाम्प्रकृतिम्माँ विदित्वा यो जपति मद्रूपाणि यो वेत्तिमन्मन्त्रँय्यो जपतिमद्रूपकल्पिताय्यँ यो जपति भगम्भजति निर्व्विकल्पः साधकः सदा मद्रूपो भवति ॥ सर्व्वाणि कर्म्माणि साध्यानि निर्भयो भवति गुरुन्नत्वा स्तुत्वा वस्त्रभूषणानि दत्त्वा इमामुपनिषद्विद्याम्प्राप्य माँ य्यो जपति सजीवन्मुक्तो भवति॥इत्यथर्व्वणवेदे सौभाग्यकाण्डेतारोपनिषत्समाप्ता ॥

अथ ताराशतनामस्तोत्रम् ॥

श्रीशिवउवाच ॥ तारणीतरलातन्वी तारातरुणवल्लरी ॥ तीरूपातरीश्यामातनुक्षीणपयोधरा ॥ १ ॥ तुर्यातरलातीव्रगमनानीलवाहिनी ॥ उग्रताराजयाचण्डी श्रीमदेकजटाशिरा ॥ ॥ २ ॥ तरुणीशाम्भवीछिन्नभालाचभद्रतारिणी ॥ उग्राउग्रप्रभानीला कृष्णानीलसरस्वती ॥ ३ ॥ द्वितीयाशोभनानित्यानवीनानित्यनूतना ॥ चण्डिकाविजयाराध्यादेवीगगनवाहिनी ॥ ॥ ४ ॥ अट्टहास्याकरालास्या चरास्यादितिपूजिता ॥ सगुणा सगुणाराध्याहरीन्द्रदेवपूजिता ॥ ५ ॥ रक्तप्रियाचरक्ताक्षीरुधिरास्यविभूषिता ॥ बलिप्रियाबलिरता दुर्द्धावलवर्तीबला ॥ ६ ॥

बलप्रियाबलरता बलरामप्रपूजिता ॥ अर्द्धकेशेश्वरीकेशा केशवा सविभूषिता ॥ ७ ॥ पद्ममालाचपद्माक्षी कामाख्या गिरिनन्दि नी ॥ दक्षिणाचैवदक्षाच दक्षजादक्षिणेरता ॥ ८ ॥ वज्रपुष्प प्रियारक्तप्रियाकुसुमभूषिता ॥ माहेश्वरीमहादेवप्रियापञ्चवि भूषिता ॥ ९ ॥ इडाचपिङ्गलाचैवसुषुम्नाप्राणरूपिणी ॥ गा न्धारीपञ्चमीपञ्चाननादिपरिपूजिता ॥ १० ॥ तथ्यविद्यातथ्य रूपातथ्यमार्ग्गानुसारिणी ॥ तत्त्वरूपातत्त्वप्रियातत्त्वज्ञानात्मि कानघा ॥ ११ ॥ ताण्डवाचारसन्तुष्टा ताण्डवप्रियकारिणी॥ता लदानरताक्रूरतापिनीतरणिप्रभा ॥ १२ ॥ त्रपायुक्तात्रपामुक्ता त र्प्पितातृप्तिकारिणी ॥ तारुण्यभावसन्तुष्टाशक्तिभक्तानुरागिणी ॥ १३ ॥ शिवासक्ताशिवरतिः शिवभक्तिपरायणा ॥ ताम्रद्युति स्ताम्ररागा ताम्रपात्रप्रभोजिनी ॥ १४ ॥ बलभद्रप्रेमरता बलि भुग्बलिकल्पिनी ॥ रामरूपारामशक्ती रामरूपानुकारिणी ॥ ॥ १५ ॥ इत्येतत्कथितन्देविरहस्यम्परमाद्भुतम् ॥ श्रुत्वामोक्षम वाप्नोतितारादेव्याश्प्रसादतः ॥ १६ ॥ यइदम्पठतिस्तोत्रं तारा स्तुतिरहस्यकम् ॥ सर्व्वसिद्धियुतोभूत्वा विहरेत् क्षितिमण्डले ॥ १७ ॥ तस्यैवमन्त्रसिद्धिःस्यान्ममसिद्धिरनुत्तमा ॥ भवत्येवम हामायेसत्यंसत्यन्नसंशयः ॥ १८ ॥ मन्देमङ्गलवारेचयश्पठेन्निशि सय्यँतः ॥ तस्यैवमन्त्रसिद्धिस्स्याद्वाणपत्यह्लँभेतसः ॥ १९ ॥ श्रद्धयाश्रद्धयावापि पठेत्तागरहस्यकम् ॥ सोऽचिरेणैवकालेनजी वन्मुक्तः शिवोभवेत् ॥ २० ॥ सहस्रावर्त्तनाद्देविपुरश्चर्य्याफलँल्ल भेत् ॥ एवंसततयुक्तायेध्यायन्तस्त्वामुपासते ॥ तेकृतार्थामहे शानिमृत्युसंसारवर्त्मनः ॥ २१ ॥ इतिस्वर्ण्णमालातन्त्रे तारणी शतनामस्तोत्रं समाप्तम् ॥

अथ श्रीतारातकारादिसहस्रनाम ॥

वसिष्ठउवाच ॥ नाम्नांसहस्रन्तारायामुखाम्भोजाद्विनिर्ग्गत म् ॥ मन्त्रसिद्धिकरम्प्रोक्तन्तन्मेवदपितामह ॥ १ ॥ ब्रह्मोवाच ॥ शृणुवत्सप्रवक्ष्यामिरहस्यंसर्व्वसिद्धिदम् ॥ यस्योपदेशमात्रेणत वसिद्धिर्ब्भविष्यति ॥२॥ महाप्रलयकालादौनष्टेस्थावरजङ्गमे ॥ महाकारंसमाकर्ण्य्य कृपयासंहृतन्तनौ ॥ ३ ॥ नाम्नातेनम हातारा ख्यातासाब्रह्मरूपिणी ॥ महाशूलत्रयङ्कृत्वातत्रचैकाकि नीस्थिता ॥ ४ ॥ पुनःसृष्टेश्चिकीर्ष्षाभूद्दिव्यसाम्राज्यसञ्ज्ञकम्॥ नाम्नांसहस्रमस्यास्तुतकाराद्यम्मयास्मृतम् ॥ ५ ॥ तत्प्रभावेण ब्रह्माण्डन्निर्म्मितंसुदृढम्महत् ॥ आविर्भूतावयन्तत्रयन्त्रैस्त स्याऽपुराद्विज ॥ ६ ॥ स्वस्यकार्य्यार्त्थिनस्तत्रभ्रान्ताभूम्याँय्य थावयम् ॥ तयोपदिष्टाऽकृपया भवामस्सृष्टिकारकाः ॥ ७ ॥ त स्याऽप्रसादाद्विप्रेन्द्रत्रयोब्रह्माण्डनायकाः ॥ अन्येसुरगणास्सर्व्वे तस्याऽपादप्रसेवकाः ॥८॥ पठनाद्धारणात्सृष्टेऽकर्त्ताहम्पालको हरिः ॥ तत्त्वाक्षरोपदेशेनसंहर्त्ताशङ्करस्स्वयम् ॥ ९ ॥ ऋषिच्छ न्दादिकध्यानम्मूलवत्परिकीर्त्तितम्॥ नियोगोमात्रसिद्धौचपुरुषा र्त्थचतुष्टये ॥१०॥ तारातारादिपञ्चार्ण्णातारान्यावेदवीर्य्यजा ॥ तारातारहितावर्ण्णा ताराद्यातारूपिणी ॥ ११ ॥ तारात्रिस मुत्पन्ना तारारात्रिवरोद्यता ॥ तारारात्रिजपासक्ता तारारात्रि स्वरूपिणी ॥ १२ ॥ तारराज्ञीस्वसन्तुष्टातारराज्ञीवरप्रदा ॥ तारराज्ञीस्वरूपाच तारराज्ञीप्रसिद्धिदा ॥ १३ ॥ तारोत्प ङ्कजागारा तारोत्पङ्कजापरा ॥ तारोत्पङ्कजाधारा तारा त्पङ्कजातथा ॥ १४ ॥ तारेश्वरीचतारोभा तारागणस्वरूपि णी ॥ तारागणसमाकीर्णा तारागणनिषेविता ॥ १५ ॥ तारा तारान्विततारारत्नान्वितविभूषणा ॥ तारागणरणासन्नाता

राकृत्यप्रपूजिता ॥ १६ ॥ तारागणकृताहारा तारागणकृताश्र या ॥ तारागणकृतागारातारागणनतत्परा ॥ १७ ॥ तारागु णगणाकीर्ण्णातारागुणगणप्रदा ॥ तारागुणगणासक्ता तारागुण गणालया ॥ १८ ॥ तारेश्वरीतारपूज्या ताराजप्यातुतारणा ॥ तारमुख्यातुताराख्या तारदक्षातुतारिणी ॥ १९ ॥ तारागम्यातुतारस्थातारामृततरङ्गिणी ॥ तारभव्यातुताराण्र्णा तारह व्यातुतारिणी ॥ २० ॥ तारकातारकान्तस्स्था तारकाराशिभू षणा ॥ तारकाहारशोभाढ्या तारकावेष्टिताङ्गणा ॥ २१ ॥ ता रकाहंसकाकीर्ण्णातारकाकृतभूषणा ॥ तारकाङ्गदशोभाङ्गीतार काश्रितकङ्कणा ॥ २२ ॥ तारकाञ्चितकाञ्चीच तारकान्वितभ क्षणा ॥ तारकाचित्रवसना तारकासनमण्डला ॥ २३ ॥ तार काकीर्ण्णमुकुटातारकाश्रितकुण्डला ॥ तारकान्विततादङ्कयुग्म गण्डस्थलोज्वला ॥ २४ ॥ तारकाश्रितपादाब्जातारकावरदा यिका ॥ तारकादत्तहृदया तारकाञ्चितसायका ॥ २५ ॥ ता रकान्यासकुशला तारकान्यासविग्रहा ॥ तारकान्याससन्तुष्टा तारकान्याससिद्धिदा ॥ २६ ॥ तारकान्यासनिलया तारका न्यासपूजिता॥तारकान्याससंहृष्टा तारकान्याससिद्धिदा॥२७॥ तारकान्याससम्मग्ना तारकान्यासवासिनी ॥ तारकान्यास सम्पूर्ण्णमन्त्रसिद्धिविधायिनी ॥ २८ ॥ तारकोपासकप्राणा ता रकोपासकप्रिया ॥ तारकोपासकासाध्या तारकोपासकष्टदा ॥ ॥ २९ ॥ तारकोपासकासक्ता तारकोपासकार्त्थिनी ॥ तारको पासकाराध्या तारकोपासकाश्रया ॥ ३० ॥ तारकासुरसन्तुष्टा तारकासुरपूजिता ॥ तारकासुरनिर्म्माणकर्त्रीतारकवन्दिता ॥ ॥ ३१ ॥ तारकासुरसम्मान्या तारकासुरमानदा ॥ तारकासु रसंसिद्धा तारकासुरदेवता ॥ ३२ ॥ तारकासुरदेहस्था

तारकासुरस्वर्ग्गदा ॥ तारकासुरसंसृष्टा तारकासुरगर्व्वदा ॥ ॥ ३३ ॥ तारकासुरसंहन्त्रीतारकासुरमर्द्दिनी ॥ तारकासुर सङ्ग्रामनर्त्तकीतारकापहा ॥ ३४ ॥ तारकासुरसङ्ग्रामकारिणी तारकारिभृत् ॥ तारकासुरसङ्ग्रामकबन्धवृन्दवन्दिता ॥ ॥ ३५ ॥ तारकारिप्रसूतारिकारिमातातुकारिका ॥ तारकारी मनोहारीवस्त्रभूषानुशासिका ॥ ३६ ॥ तारकारीविधात्रीच ता रकारिनिषेविता ॥ तारकारीवचस्तुष्टा तारकारीसुशिक्षिता ॥ ॥ ३७ ॥ तारकारीसुसन्तुष्टा तारकारिविभूषिता ॥ तारकारि कृतोत्सङ्गी तारकारिप्रहर्ष्षदा ॥ ३८ ॥ तमः सम्पूर्णसर्वाङ्गी त मोलिप्तकलेवरा ॥ तमोव्याप्तस्थलासङ्घातम×पटलसन्निभा ॥ ॥ ३९ ॥ तमोहन्त्रीतम×कर्त्रीतमः सञ्चारकारिणी ॥ तमोगा त्रीतमोदात्री तम×पात्रीतमोपहा ॥ ४० ॥ तमोराशिपूर्ण्णशशि स्तमोराशिविनाशिनी ॥ तमोराशिकृतध्वंसी तमोराशिभयङ्करी ॥ ४१ ॥ तमोगुणप्रसन्नास्या तमोगुणसुसिद्धिदा ॥ तमोगुणो क्तमार्ग्गस्था तमोगुणविराजिता ॥ ४२ ॥ तमोगुणस्तुतिपरा तमोगुणविवर्द्धिनी ॥ तमोगुणाश्रितपरा तमोगुणविनाशिनी ॥ ॥ ४३ ॥ तमोगुणाक्षयकरी तमोगुणकलेवरा ॥ तमोगुणध्वं सतुष्टा तम×पारेप्रतिष्ठिता ॥ ४४ ॥ तमोभवभवप्रीता तमो भवभवप्रिया ॥ तमोभवभवाश्रद्धा तमोभवभवाश्रया ॥ ४५ ॥ तमोभवभवध्याना तमोभवभवार्च्चिता ॥ तमोभवभवप्रीत्याली ढकुम्भस्थलास्थिता ॥ ४६ ॥ तपस्विवृन्दसन्तुष्टा तपस्विवृन्द पुष्टिदा ॥ तपस्विवृन्दसंस्तुत्या तपस्विवृन्दवन्दिता ॥४७ ॥ त पस्विवृन्दसम्पन्ना तपस्विवृन्दहर्ष्षदा ॥ तपस्विवृन्दसम्पूज्या त पस्विवृन्दभूषिता ॥ ४८ ॥ तपस्विचित्ततल्पस्था तपस्विचि त्तमध्यगा ॥ तपस्विचित्तचित्तार्हा तपस्विचित्तहारिणी ॥ ४९ ॥

तपस्विकल्पवल्लाभातपस्विकल्पपादपी ॥ तपस्विकामधेनुश्च तपस्विकामपूर्त्तिदा ॥ ५० ॥ तपस्वित्राणनिरतातपस्विगृहसंस्थिता ॥ तपस्विगृहराजश्रीस्तपस्विराज्यदायिका ॥ ५१ ॥ तपस्विमानसाराध्यातपस्विमानदायिका ॥ तपस्वितापसंहर्त्री तपस्वितापशान्तिकृत् ॥ ५२ ॥ तपस्विसिद्धिविद्याच तपस्विमन्त्रसिद्धिकृत्॥तपस्विमन्त्रतन्त्रेशी तपस्विमन्त्ररूपिणी ॥५३॥ तपस्विमन्त्रनिपुणा तपस्विकर्म्मकारिणी ॥ तपस्विकर्म्मसम्भूता तपस्विकर्म्मसाक्षिणी ॥ ५४ ॥ तपस्सेव्यातपोभव्या तपोभाव्यातपस्विनी ॥ तपोवश्यातपोगम्या तपोगेहनिवासिनी ॥ ५५ ॥ तपोधन्यातपोमान्या तपःकन्यातपोवृता ॥ तपस्तथ्या तपोगोप्यातपोजप्यातपोनुता ॥ ५६ ॥ तपस्साध्यातपोराध्या तपोवन्द्यातपोमयी ॥ तपस्सन्ध्यातपोवन्ध्या तपस्सान्निध्यकारिणी ॥ ५७ ॥ तपोध्येयातपोगेया तपस्तप्तातपोवला ॥ तपोलेयातपोदेया तपस्तत्त्वफलप्रदा ॥ ॥ ५८ ॥ तपोविघ्नवरघ्नीच तपोविघ्नविनाशिनी ॥ तपोविघ्नचयध्वंसीतपोविघ्नभयङ्करी ॥ ५९ ॥ तपोभूमिवरप्राणातपोभूमिपतिस्तुता ॥ तपोभूमिपतिध्येया तपोभूमिपतीष्टदा ॥ ६० ॥ तपोवनकुरङ्गस्था तपोवनविनाशिनी ॥ तपोवनगतिप्रीता तपोवनविहारिणी ॥ ६१ ॥ तपोवनफलासक्ता तपोवनफलप्रदा॥ तपोवनसुसाध्याच तपोवनसुसिद्धिदा ॥ ६२ ॥ तपोवनसुसेव्याचतपोवननिवासिनी ॥ तपोधनसुसंसेव्या तपोधनसुसाधिता ॥ ६३ ॥ तदोधनसुसँल्लीना तपोधनमनोमयी ॥ तपोधननमस्कारातपोधनविमुक्तिदा ॥ ६४ ॥ तपोधनधनासाध्यातपोधनधनात्मिका ॥ तपोधनधनाराध्यातपोधनफलप्रदा ॥ ६५ ॥ तपोधनधनाढ्याच तपोधनधनेश्वरी ॥ तपोधनधन

प्रीता तपोधनधनालया ॥ ६६ ॥ तपोधनजनाकीर्ण्णा तपोधन जनाश्रया ॥ तपोधनजनाराध्या तपोधनजनप्रसूः ॥ ६७ ॥ त पोधनजनप्राणा तपोधनजनेष्टदा ॥ तपोधनजनासाध्या त पोधनजनेश्वरी ॥ ६८ ॥ तरुणासृक्प्रपानार्त्ततरुणासृक्प्रत र्पिता ॥ तरुणासृक्समुद्रस्था तरुणासृक्प्रहर्ष्यदा ॥ ६९ ॥ तरुणासृक्समुसन्तुष्टातरुणासृग्विलेपिता ॥ तरुणासृङ्नदीप्राणा तरुणासृग्विभूषणा ॥ ७० ॥ तरुणैणबलिप्रीता तरुणैणबलि प्रिया ॥ तरुणैणबलिप्राणा तरुणैणबलीष्टदा ॥ ७१ ॥ तरु णाजबलिप्रीता तरुणाजबलिप्रिया ॥ तरुणाजबलिप्राणा त रुणाजबलिप्रभुक् ॥ ७२ ॥ तरुणादित्यसङ्काशा तरुणादित्य विग्रहा ॥ तरुणादित्यरुचिरा तरुणादित्यनिर्म्मला ॥ ७३ ॥ तरुणादित्यनिलया तरुणादित्यमण्डला ॥ तरुणादित्यललिता तरुणादित्यकुण्डला ॥ ७४ ॥ तरुणार्कसमज्योत्स्ना तरुणार्क समप्रभा॥तरुणार्कप्रतीकारा तरुणार्कप्रवर्द्धिता ॥७५॥ तरुणात रुणनेत्राच तरुणातरुणलोचना ॥ तरुणातरुणनेत्राच तरुणात रुणभूषणा ॥ ७६ ॥ तरुणीदत्तसङ्केता तरुणीदत्तभूषणा ॥ त रुणीगणसन्तुष्टा तरुणीतरुणीमणिः ॥ ७७ ॥ तरुणीमणिसंसे व्या तरुणीमणिवन्दिता ॥ तरुणीमणिसन्तुष्टातरुणीमणिपूजि ता ॥ ७८ ॥ तरुणीवृन्दसँव्याद्या तरुणीवृन्दवन्दिता ॥ तरु णीवृन्दसंस्तुत्या तरुणीवृन्दमानदा ॥ ७९ ॥ तरुणीवृन्दमध्य स्था तरुणीवृन्दवेष्टिता ॥ तरुणीवृन्दसम्प्रीता तरुणीवृन्दभू षिता ॥ ८० ॥ तरुणीजपसंसिद्धा तरुणीजपमोक्षदा ॥ तरु णीपूजकासक्ता तरुणीपूजकार्त्थिनी ॥ ८१ ॥ तरुणीपूजकश्री दा तरुणीपूजकार्त्तिहा ॥ तरुणीपूजकप्राणा तरुणीनिन्दका र्त्तिदा ॥ ८२ ॥ तरुणीकोटिनिलया तरुणीकोटिविग्रहा ॥ तरु

णीकोटिमध्यस्था तरुणीकोटिवेष्टिता ॥ ८३ ॥ तरुणीकोटिदुस्साध्या तरुणीकोटिविग्रहा ॥ तरुणीकोटिरुचिरा तरुणीतरुणीश्वरी ॥ ८४ ॥ तरुणीमणिहाराढ्या तरुणीमणिकुण्डला॥तरुणीमणिसन्तुष्टा तरुणीमणिमाण्डिता ॥ ८५ ॥ तरुणीसरणीप्रीता तरुणीसरणीरता ॥ तरुणीसरणीस्थाना तरुणीसरणीरता ॥ ८६ ॥ तरणीमण्डलश्रीदा तरणीमण्डलेश्वरी ॥ तरणीमण्डलश्रद्धा तरणीमण्डलस्थिता ॥८७ ॥ तरणीमण्डलार्घाढ्या तरणीमण्डलार्च्चिता ॥ तरणीमण्डलध्येया तरणीभवसागरा॥८८॥ तरणीकारणासक्ता तरणीतक्षकार्च्चिता ॥ तरणीतक्षकश्रीदा तरणीतक्षकार्त्थिनी ॥ ८९ ॥ तरणीतरणशीलाच तरीतरणतारिणी ॥ तरीतरणसंवेद्या तरीतरणकारिणी ॥ ९० ॥ तरुरूपा तरूपस्था तरुस्तरुलतामयी ॥ तरुरूपातरुस्थाच तरुमध्यनिवासिनी ॥ ९१ ॥ तप्तकाञ्चनगेहस्था तप्तकाञ्चनभूमिका॥तप्तकाञ्चनप्राकारा तप्तकाञ्चनपादुका॥९२॥तप्तकाञ्चनदीप्ताङ्गी तप्तकाञ्चनसन्निभा ॥ तप्तकाञ्चनगौराङ्गीतप्तकाञ्चनमञ्चगा॥९३॥ तप्तकाञ्चनवस्त्राढ्या तप्तकाञ्चनरूपिणी ॥ तप्तकाञ्चनमध्यस्था तप्तकाञ्चनकारिणी॥९४॥तप्तकाञ्चनमासार्च्या तप्तकाञ्चनपात्रभुक् ॥ तप्तकाञ्चनशैलस्था तप्तकाञ्चनकुण्डला ॥ ९५ ॥ तप्तकाञ्चनक्षत्राढ्या तप्तकाञ्चनदण्डधृक् ॥ तप्तकाञ्चनभूपाढ्या तप्तकाञ्चनदानदा ॥ ९६ ॥ तप्तकाञ्चनदेशेशी तप्तकाञ्चनचापधृक् ॥ तप्तकाञ्चनतूणाढ्या तप्तकाञ्चनवाणभृत् ॥ ९७ ॥ तलातलविधात्रीचतलातलविधायिनी ॥ तलातलस्वरूपेशी तलातलविहारिणी ॥ ९८ ॥ तलातलजनासाध्या तलातलजनेश्वरी ॥ तलातलजनाराध्या तलातलजनार्त्थदा ॥ ९९ ॥ तलातलजयाभाक्षी तलातलजचञ्चला ॥ तलातलजरत्नाढ्या तलातल

जदेवता ॥ १०० ॥ तटिनीस्थानरसिका तटिनीतटवासिनी ॥ तटिनीतटिनीतीरगामिनीतटिनीप्रिया ॥ १०१ ॥ तटिनीप्लुवनप्रीता तटिनीप्लुवनोद्यता ॥ तटिनीप्लुवनश्लाघ्या तटिनीप्लुवनार्त्थदा ॥१०२॥ तटलास्थातटस्थाना तटेशी तटवासिनी ॥ तटपूज्यातटाराध्या तटरोमसुखार्त्थिनी ॥ १०३ ॥ तट जातटरूपाच तटस्थातटचञ्चला ॥ तटसन्निधिगेहस्थासाहिता तटशायिनी ॥ १०४ ॥ तरङ्गिणीतरङ्गाभा तरङ्गायतलोचना ॥ तरङ्गसमदुर्द्धर्षातरङ्गसमचञ्चला॥१०५॥ तरङ्गसमदीर्घाङ्गी त रङ्गसमवर्द्धिता ॥ तरङ्गसमसंवृद्धिस्तरङ्गसमनिर्म्मला ॥१०६॥ तडागमध्यनिलया तडागमध्यसम्भवा ॥ तडागरचनश्लाघ्या तडागरचनोद्यता ॥ १०७ ॥ तडागकुमुदामोदी तडागेशीत डागिनी ॥ तडागनीरसंस्नाता तडागनीरनिर्म्मला ॥ १०८ ॥ तडागकमलागारा तडागकमलालया॥तडागकमलान्तस्स्था त डागकमलोद्यता ॥ १०९ ॥ तडागकमलाङ्गीच तडागकमला ननना ॥ तडागकमलप्राणा तडागकमलेक्षणा ॥ ११० ॥ तडा गरक्तपद्मस्था तडागश्वेतपद्मगा ॥ तडागनीलपद्माभा तडागनी लपद्मभृत् ॥१११॥ तनुस्तनुगतातन्वी तन्वङ्गीतनुधारिणी॥ तनु रूपातनुगता तनुधृक्तनुरूपिणी॥११२ ॥ तनुस्थातनुमध्याङ्गीत नुकृत्तनुमङ्गला ॥ तनुसेव्यातुतनुजा तनुजातनुसम्भवा॥११३॥ तनुभृत्तनुसम्भूता तनुदातनुकारिणी ॥ तनुभृत्तनुसंहन्त्री तनुस श्चारकारिणी॥ ११४ ॥ तथ्यवाक्तथ्यवचना तथ्यकृत्तथ्यवादि नी ॥ तथ्यभृत्तथ्यचरिता तथ्यधर्म्मानुवर्त्तिनी ॥११५॥ तथ्यभु क्तथ्यगमना तथ्यभक्तिवरप्रदा ॥ तथ्यनीचेश्वरीतथ्यचित्ताचा राशुसिद्धिदा ॥ ११६ ॥ तर्क्यातर्क्यस्वभावाच तर्कदायातुतर्क कृत् ॥ तर्काध्यापनमध्यस्था तर्काध्यापनकारिणी ॥ ११७ ॥

तर्क्काध्यापनसन्तुष्टा तर्क्काध्यापनरूपिणी ॥ तर्क्काध्यापनसंशीला तर्क्कार्थप्रतिपादिता ॥ ११८ ॥ तर्क्काध्यापनसन्तृप्ता तर्क्कार्थप्रतिपादिका ॥ तर्क्कवादाश्रितपदा तर्क्कवादविवर्द्धिनी ॥ ११९ ॥ तर्क्कवादैकनिपुणा तर्क्कवादप्रचारिणी ॥ तमालदलश्यामाङ्गी तमालदलमालिनी ॥ १२० ॥ तमालवनसङ्केतातमालपुष्पपूजिता ॥ तगरीतगराराद्ध्या तगरार्च्चितपादुका ॥ १२१ ॥ तगरस्रक्सुसन्तुष्टा तगरस्रग्विराजिता ॥ तगराहुतिसन्तुष्टा तगराहुतिकीर्त्तिदा ॥ १२२ ॥ तगराहुतिसंसिद्धा तगराहुतिमानदा ॥ तडित्तडिल्लताकारातडिच्चञ्चललोचना ॥ १२३ ॥ तडिल्लतातडित्तन्वी तडिद्दीप्ततडित्प्रभा ॥ तद्रूपातत्स्वरूपेशी तन्मयीतत्त्वरूपिणी ॥ १२४ ॥ तत्स्थानदाननिरता तत्कर्म्मफलदायिनी ॥ तत्त्वकृत्तत्त्वदातत्त्वा तत्त्ववित्तत्त्वतर्पिता ॥ १२५ ॥ तत्त्वार्च्च्यातत्त्वपूजाच तत्त्वार्घ्यातत्त्वरूपिणी ॥ तत्त्वज्ञानप्रदानेशी तत्त्वज्ञानसुमोक्षदा ॥ १२६ ॥ त्वरितात्वरितप्रीता त्वरितार्त्तिविनाशिनी ॥ त्वरितासवसन्तुष्टात्वरितासवतर्पिता ॥ १२७ ॥ त्वग्वस्त्रात्वक्परीधाना तरलातरलेक्षणा ॥ तरक्षुचर्म्मवसना तरक्षुत्वग्विभूषणा ॥ १२८ ॥ तरक्षुस्तरक्षुप्राणा तरक्षुपृष्ठगामिनी ॥ तरक्षुपृष्ठसंस्थाना तरक्षुपृष्ठवासिनी ॥ १२९ ॥ तर्पितोदैस्तर्पणाशा तर्पणासक्तमानसा ॥ तर्पणानन्दहृदया तर्पणाधिपतिस्ततिः ॥ १३० ॥ त्रयीमयीत्रयीसेव्या त्रयीपूज्यात्रयीकथा ॥ त्रयीभव्यात्रयीभाव्या त्रयीहव्यात्रयीयुता ॥ १३१ ॥ त्र्यक्षरीत्र्यक्षरेशानी त्र्यक्षरीशीघ्रसिद्धिदा ॥ त्र्यक्षरेशीत्र्यक्षरीस्था त्र्यक्षरीपुरुषापदा ॥ १३२ ॥ तपनातपनेष्टाच तपस्तपनकन्यका ॥ तपनांशुसमासङ्गा तपनकोटिकान्तिकृत् ॥ १३३ ॥ तपनीयातल्पगता तल्पतल्पविधायि

नी ॥ तल्पकृत्तल्पगातल्पदात्रीतल्पतलाश्रया ॥ १३४ ॥ त
पनीयतलारात्री तपनीयांशुप्रार्थिनी ॥ तपनीयप्रदातप्ता तप
नीयाद्रिसंस्थिता ॥ १३५ ॥ तल्पेशीतल्पदातल्पसंस्थितात
ल्पवल्लभा ॥ तल्पप्रियातल्परता तल्पनिर्म्माणकारिणी ॥१३६॥
तरसापूजनासक्ततरसावरदायिनी ॥ तरसासिद्धिसन्धात्रीत
रसामोक्षदायिनी ॥ १३७ ॥ तापसीतापसाराध्या तापसा
र्त्तिविनाशनी ॥ तापसार्त्तातापसश्रीस्तापसप्रियवादिनी ॥
॥ १३८ ॥ तापसानन्दहृदया तापसानन्ददायिनी ॥ तापसा
श्रितपादाब्जा तापसासक्तमानसा ॥ १३९ ॥ तामसीतामसी
पूज्या तामसीप्रणयोत्सुका ॥ तामसीतामसीसीता तामसी
शीघ्रसिद्धिदा ॥ १४० ॥ तालेशीतालभुक्तालदात्रीतालोपमस्त
नी ॥ तालवृक्षस्थितातालवृक्षजातालरूपिणी ॥ १४१ ॥ ता
र्क्षीतार्क्षसमारूढा तार्क्षेशीतार्क्षपूजिता ॥ तार्क्षेश्वरीतार्क्षमाता
तार्क्षेशीवरदायिनी ॥ १४२ ॥ तापीतुतपिनीतापसंहन्त्रीता
पनाशिनी ॥ तापदात्रीतापकर्त्री तापविध्वंसकारिणी ॥ १४३ ॥
त्रासकर्त्रीत्रासदात्री त्रासहर्त्रीचत्रासहा ॥ त्रासितात्रासरहिता
त्रासनिर्म्मूलकारिणी ॥ १४४ ॥ त्राणकृत्त्राणसंशीला तानेशी
तानदायिनी॥तानगानरतातानकारिणीतानगायिनी ॥ १४५ ॥
तारुण्यामृतसम्पूर्णा तारुण्यामृतवारिधिः ॥ तारुण्यामृतसन्तु
ष्टा तारुण्यामृततर्प्पिता ॥ १४६ ॥ तारुण्यामृतपूर्णाङ्गी
तारुण्यामृतविग्रहा ॥ तारुण्यगुणसम्पन्नातारुण्योक्तिविशार
दा ॥ १४७ ॥ ताम्बूलीताम्बुलेशानी ताम्बूलचर्व्वणोद्य
ता ॥ ताम्बूलपूरितास्याच ताम्बूलारुणिताधरा ॥ १४८ ॥
ताटङ्करत्नविख्यातिस्ताटङ्करत्नभूषिणी ॥ ताटङ्करत्नमध्य
स्था ताटङ्कद्वयभूषिता ॥ १४९ ॥ तिथीशातिथिसम्पू

ज्या तिथिस्थातिथिरूपिणी ॥ त्रितिथिवासिनीसेव्या तिथीशवरदायिनी ॥ १५० ॥ तिलोत्तमादिकाराध्यातिलोत्तमादिकप्रभा ॥ तिलोत्तमातिलप्रज्ञा तिलाराध्यातिलार्च्चिता ॥ ॥ १५१ ॥ तिलभुक्तिलसन्दात्री तिलतुष्टातिलालया ॥ तिलदातिलसङ्काशा तिलतैलविधायिनी ॥ १५२ ॥ तिलतैलोपलिप्ताङ्गी तिलतैलसुगन्धिनी ॥ तिलाज्यहोमसन्तुष्टा तिलाज्यहोमसिद्धिदा ॥ १५३ ॥ तिलपुष्पाञ्जलिप्रीता तिलपुष्पाञ्जलिप्रिया ॥ तिलपुष्पाञ्जलिश्रेष्ठा तिलपुष्पाभनाशिनी ॥ १५४ ॥ तिलकाश्रितसिन्दूरा तिलकाङ्कितचन्दना ॥ तिलकाहृतकस्तूरी तिलकामोदमोहिनी ॥ १५५ ॥ त्रिगुणात्रिगुणाकारा त्रिगुणान्वितविग्रहा ॥ त्रिगुणाकारविख्याता त्रिमूर्त्तिस्त्रिगुणात्मिका ॥ १५६ ॥ त्रिशिरा त्रिपुरेशानी त्रिपुरात्रिपुरेश्वरी ॥ त्रिपुरेशीत्रिलोकस्था त्रिपुरीत्रिपुराम्बिका ॥ १५७ ॥ त्रिपुरारिसमाराध्यात्रिपुरारिवरप्रदा ॥ त्रिपुरारिशिरोभूषा त्रिपुरारिवरप्रदा ॥ १५८ ॥ त्रिपुरारीष्टसन्दात्री त्रिपुरारीष्टदेवता ॥ त्रिपुरारिकृतार्द्धाङ्गी त्रिपुरारिविलासिनी ॥ १५९ ॥ त्रिपुरासुरसंहन्त्री त्रिपुरासुरमर्द्दिनी ॥ त्रिपुरासुरसंसेव्या त्रिपुरासुरवर्य्यया॥१६०॥ त्रिकुटात्रिकुटाराध्या त्रिकूटार्च्चितविग्रहा ॥ त्रिकूटाचलमध्यस्था त्रिकूटाचलवासिनी ॥ १६१ ॥ त्रिकूटाचलसञ्जाता त्रिकूटाचलनिर्ग्गता ॥ त्रिजटात्रिजटेशानी त्रिजटावरदायिनी ॥ ॥ १६२ ॥ त्रिनेत्रेशीत्रिनेत्राच त्रिनेत्रवरवर्ण्णिनी ॥ त्रिवलीत्रिवलीयुक्तात्रिशूलवरधारिणी ॥ १६३ ॥ त्रिशूलेशीत्रिशूलीशी त्रिशूलभृत्रिशूलिनी ॥ त्रिमनुस्त्रिमनूपास्यात्रिमनूपासकेश्वरी ॥ ॥ १६४ ॥ त्रिमनुजपसन्तुष्टा त्रिमनुस्तूर्ण्णसिद्धिदा ॥ त्रिमनुपूजनप्रीता त्रिमनुध्यानमोक्षदा ॥ १६५ ॥ त्रिविधात्रिविधाभ

क्तिस्त्रिमतात्रिमतेश्वरी ॥ त्रिभावस्थात्रिभावेशी त्रिभावपरिपू रिता ॥१६६॥ त्रितत्त्वात्मात्रितत्त्वेशी त्रितत्त्वज्ञात्रितत्त्वधृक् ॥ त्रितत्त्वाचमनप्रीता त्रितत्त्वाचमनेष्टदा ॥ १६७ ॥ त्रिकोणस्था त्रिकोणेशी त्रिकोणचक्रवासिनी ॥ त्रिकोणचक्रमध्यस्था त्रिको णबिन्दुरूपिणी ॥ १६८ ॥ त्रिकोणयन्त्रसंस्थाना त्रिकोणयन्त्र रूपिणी ॥ त्रिकोणयन्त्रसम्पूज्या त्रिकोणयन्त्रसिद्धिदा ॥१६९॥ त्रिवर्ण्णाढ्यात्रिवर्ण्णेशी त्रिवर्ण्णोपासिरूपिणी॥त्रिवर्ण्णस्थात्रिव र्ण्णाढ्या त्रिवर्ण्णवरदायिनी ॥ १७० ॥ त्रिवर्णार्घ्यात्रिवर्ण्णार्च्या त्रिवर्ग्गफलदायिनी ॥ त्रिवर्ग्गाढ्यात्रिवर्ग्गेशीत्रिवर्ग्गाद्यफलप्र दा ॥ १७१ ॥ त्रिसन्ध्यार्च्यात्रिसन्ध्येशी त्रिसन्ध्याराधनेष्टदा॥ त्रिसन्ध्यार्च्चनसन्तुष्टा त्रिसन्ध्याजपमोक्षदा ॥ १७२ ॥ त्रिपदा राधितपदा त्रिपदात्रिपदेश्वरी ॥ त्रिपदाप्रतिपाद्येशी त्रिपदाप्र तिपादिका ॥ १७३ ॥ त्रिशक्तिश्चत्रिशक्तेशीत्रिशक्तेष्टफलप्रदा ॥ त्रिशक्तेष्टात्रिशक्तीष्टा त्रिशक्तिपरिवेष्टिता ॥ १७४ ॥ त्रि वेणीचत्रिवेणीस्त्री त्रिवेणीमाधवार्च्चिता ॥ त्रिवेणीजलसन्तुष्टा त्रिवेणीस्नानपुण्यदा ॥ १७५ ॥ त्रिवेणीजलसंस्नाता त्रिवे णीजलरूपिणी ॥ त्रिवेणीजलपूताङ्गी त्रिवेणीजलपूजिता ॥ ॥ १७६ ॥ त्रिनाडीस्थात्रिनाडीशी त्रिनाडीमध्यगामिनी ॥ त्रिनाडीसन्ध्यसञ्छेया त्रिनाडीचत्रिकोटिनी ॥ १७७ ॥ त्रि पञ्चाशत्त्रिरेखाच त्रिशक्तिपथगामिनी ॥ त्रिपथस्थात्रिलोकेशी त्रिकोटिकुलमोक्षदा ॥ १७८ ॥ त्रिरामेशीत्रिरामार्च्या त्रिरा मवरदायिनी ॥ त्रिदशार्थितपादाब्जा त्रिदशालयचञ्चला ॥ ॥ १७९ ॥ त्रिदशात्रिदशप्रार्त्थ्यात्रिदशाशुवरप्रदा ॥ त्रिदशै श्वर्य्यसम्पन्ना त्रिदशेश्वरसेविता ॥ १८० ॥ त्रियामार्च्या त्रियामेशी त्रियामानन्तसिद्धिदा ॥ त्रियामेशाधिकज्योत्स्ना

त्रियामेशाधिकानना ॥ १८१ ॥ त्रियामानाथवत्सौम्या त्रिया मानाथभूषणा ॥ त्रियामानाथलावण्यारत्नकोटियुताननाः ॥ ॥ १८२ ॥ त्रिकालस्थात्रिकालज्ञा त्रिकालज्ञत्वकारिणी ॥ त्रि कालेशी त्रिकालार्च्या त्रिकालज्ञत्वदायिनी ॥ १८३ ॥ तीरभु क्तीरगातीरसरितातीरवासिनी ॥ तीरभुग्देशसञ्जातातीरभु ग्देशसंस्थिता ॥ १८४ ॥ तिग्मातिग्मांशुसङ्काशा तिग्मांशुको डसंस्थिता ॥ तिग्मांशुकोटिदीप्ताङ्गीतिग्मांशुकोटिविग्रहा ॥ ॥ १८५ ॥ तीक्ष्णातीक्ष्णतरातीक्ष्णमहिषासुरमर्द्दिनी ॥ ती क्ष्णकर्त्रीलसत्पाणिस्तीक्ष्णासिवरधारिणी ॥ १८६ ॥ तीव्राती व्रगतिस्तीव्रासुरसङ्घविनाशिनी ॥ तीव्राष्टनागाभरणातीव्रमु ण्डविभूषणा ॥१८७॥ तीर्थात्मिकातीर्थमयी तीर्थेशीतीर्थपू जिता ॥तीर्थराजेश्वरीतीर्थफलदातीर्थदानदा ॥१८८॥तुमुली तुमुलप्राज्ञीतुमुलासुरघातिनी॥ तुमुलक्षतजप्रीतातुमुलाङ्गणवर्त्त की ॥१८९॥ तुरगीतुरगारूढा तुरङ्गपृष्ठगामिनी॥तुरङ्गगमनाह्वा दातुरङ्गवेगगामिनी ॥ १९० ॥ तुरीयातुलनातुल्यातुल्यवृत्तिस्तु तुल्यकृत्॥तुलनेशीतुलाराशिस्तुलाराशीत्वसूक्ष्मवित् ॥१९१॥ तुम्बिकातुम्बिकापात्रभोजनातुम्बिकार्त्थिनी ॥ तुलसीतुलसीव र्य्यातुलजातुलजेश्वरी ॥ १९२ ॥ तुषाग्निव्रतसन्तुष्टातुषाग्निस्तुष राशिकृत् ॥ तुषारकरसीताङ्गी तुषारकरपूर्त्तिकृत् ॥ १९३ ॥ तुषाराद्रिस्तुषाराद्रिसुतातुहिनदीधितिः ॥ तुहिनाचलकन्या च तुहिनाचलवासिनी ॥ १९४ ॥ तूर्य्यवर्ग्गेश्वरीतूर्य्यवर्ग्गदा तूर्य्यवेददा ॥ तूर्य्यवर्य्यात्मिकातूर्य्यतूर्य्येश्वरस्वरूपिणी ॥ ॥ १९५ ॥ तुष्टिदातुष्टिकृत्तुष्टिस्तूणीरद्वयपृष्ठधृक् ॥ तुम्बुराज्ञा नसन्तुष्टा तुष्टसंसिद्धिदायिनी ॥ १९६ ॥ तूर्णराज्यप्रदातूर्ण गद्गदातूर्णपद्मदा ॥ तूर्णपाण्डित्यसन्दात्री तूर्णापूर्णबलप्रदा

॥ १९७ ॥ तृतीयाचतृतीयेशी तृतीयातिथिपूजिता ॥ तृतीया चन्द्रचूडेशी तृतीयाचन्द्रभूषणा ॥ १९८ ॥ तृप्तिस्तृप्तिकरीतृप्ता तृष्णतृष्णाविवर्द्धिनी ॥ तृष्णापूर्णकरीतृष्णानाशिनीतृषितातृषा ॥ १९९ ॥ त्रेतासंसाधितात्रेता त्रेतायुगफलप्रदा ॥ त्रैलोक्यपूजात्रैलोक्यदात्रीत्रैलोक्यसिद्धिदा ॥ २०० ॥ त्रैलोक्येश्वरतादात्रीत्रैलोक्यपरमेश्वरी ॥ त्रैलोक्यमोहनेशानीत्रैलोक्यराज्यदायिनी ॥ २०१ ॥ तैत्रिशाखेश्वरीतैत्रीशाखातैत्रिविवेकदा ॥ तोरणान्वितगेहस्था तोरणासक्तमानसा ॥ २०२ ॥ तोलकास्वर्णसन्दात्री तौलकास्वर्णकङ्कणा॥तोमरायुधरूपाच तोमरायुधधारिणी ॥ २०३ ॥ तौर्य्यत्रिकेश्वरीतौर्य्यन्त्रिकीतौर्य्यन्त्रिकोत्सुकी ॥ तन्त्रकृत्तन्त्रवत्सूक्ष्मा तन्त्रमन्त्रस्वरूपिणी ॥ २०४ ॥ तन्त्रकृत्तन्त्रसम्पूज्या तन्त्रेशीतन्त्रसम्मता ॥ तन्त्रज्ञातन्त्रवित्तन्त्रसाध्यातन्त्रस्वरूपिणी॥ २०५ ॥ तन्त्रस्थातन्त्रजातन्त्रीतन्त्रभृत्तन्त्रमन्त्रदा ॥ तन्त्राद्यातन्त्रगातन्त्रातन्त्रार्च्या तन्त्रसिद्धिदा॥ २०६ ॥इतितेकथितन्दिव्यङ्क्रतुकोटिफलप्रदम् ॥ नाम्नांसहस्रन्तारायास्तकाद्यंसुगोपितम् ॥२०७॥ दानय्यँज्ञस्तपस्तीर्थंव्रतञ्चानशनादिकम् ॥ एकैकनामजम्पुण्यंसन्ध्यातुगदितम्मया ॥ २०८ ॥ गुरौदेवेतथामन्त्रे यस्यस्यान्निश्चलामतिः ॥ तस्यैवस्तोत्रपाठेस्मिन्सम्भवेदधिकारिता ॥ २०९ ॥ महाचीनक्रमाभिन्नपीढान्यस्तकलेवरः ॥ क्रमदीक्षान्वितोमन्त्री पठेदेतन्नचान्यथा ॥२१०॥ गन्धपुष्पादिभिर्द्रव्यैर्म्मकारैः पञ्चकैर्द्विजः ॥ सम्पूज्यतारांविधिवत्पठेदेतदनन्यधीः ॥ ॥ २११ ॥ अष्टम्याञ्चचतुर्दश्यांसङ्क्रान्तौरविवासरे ॥ शनिभौमदिने रात्रौ ग्रहणेचन्द्रसूर्य्ययोः ॥ २१२ ॥ तारारात्रौकालरात्रौ मोहरात्रौविशेषतः ॥ पठनान्मन्त्रसिद्धिःस्यात्सर्व्वज्ञत्वम्प्र

जायते ॥ २१३ ॥ श्मशानेप्रान्तरेरम्येशून्यागारेविशेषतः॥देवागारेगिरौवापि स्तवपारायणश्चरेत् ॥ २१४ ॥ ब्रह्महत्यासुरापानंस्तेयंस्त्रीगमनादिकम् ॥ गुरुतल्पेतथाचान्यत्पातकन्नश्यतिध्रुवम् ॥ २१५ ॥ लतामध्यगतोमन्त्री श्रद्धयाचार्च्चयेद्यदि ॥ आकर्षयेत्तदारम्भाम्मेनामपितथोर्व्वशीम् ॥ २१६ ॥ संग्रामसमयेवीरस्तारासाम्राज्यकीर्त्तनात् ॥ चतुरङ्गंचयञ्जित्वासर्व्वसाम्राज्यभाग्भवेत् ॥ २१७ ॥ निशार्द्धेपूजनान्तेच प्रतिनाम्ना प्रपूजयेत् ॥ एकैककरवीराद्यैर्म्मन्दारैर्नीलवारिजैः ॥ २१८ ॥ गद्यपद्यमयीवाणीभूभोज्याचप्रवर्त्तते ॥ पाण्डित्यंसर्व्वशास्त्रेषु वादीत्रस्यतिदर्शनात् ॥ ११९ ॥ वह्निजायान्तकैरेतैस्तारार्द्धैःप्रतिनामभिः ॥ राजन्यंसर्व्वराजेषु परकायप्रवेशनम् ॥ ॥२२०॥ अन्तर्द्धानङ्गेचरत्वम्बहुकायप्रकाशनम् ॥ गुटिकापादुकापद्मावतीमधुमतीतथा ॥ २२१ ॥ रसंरसायनाः सर्व्वाःसिद्धयःसमुपस्थिताः ॥ कर्प्पूरागरुकस्तुरीचन्दनैःसय्युतैर्ज्जलैः ॥ २२२ ॥ मूलंसम्पुटितेनैव प्रतिनाम्नाप्रपूजयेत् ॥ यक्षराक्षसगन्धर्व्वा विद्याधरमहोरगाः ॥ २२३ ॥ भूतप्रेतपिशाचाद्याडाकिनीशाकिनीगणाः ॥ दुष्टाभैरववेताला कूष्माण्डा किन्नरीगणाः ॥ २२४ ॥ भयभीताः पलायन्तेतेजसासाधकस्यच ॥ मन्त्रज्ञानेसमुत्पन्ने प्रतिनाम्नाविचारयेत् ॥ २२५ ॥ मन्त्रसम्पुटितेनैव तस्यशान्तिर्भवेद्ध्रुवम् ॥ ललितावशमायातिदास्यतायँयान्तिपार्थिवाः ॥ २२६ ॥ अग्नयःशीतताय्यँयान्ति जापकस्यचभाषणात् ॥ एकावर्त्तनमात्रेणराजभीतिनिवारणम् ॥ २२७ ॥ वेलावर्त्तनमात्रेण पशुवृद्धिःप्रजायते ॥ दशावृत्याधनप्राप्तिर्विंशत्याराज्यमाप्नुयात् ॥ २२८ ॥ शतावृत्यागृहेतस्य चञ्चलानिश्चलाभवेत् ॥ गङ्गाप्रवाहवद्वाणी प्रलापादपिजायते ॥ २२९ ॥ पुत्रपौत्रान्वितोमन्त्री चिरञ्जीवीतुदेववत् ॥ शतद्वयावर्त्तनेन देववत्पूज्यतेजनैः ॥२३०॥ शतपञ्चकमावर्त्त्य सभवेद्धरवोपमः ॥

सहस्रावर्त्तनेनैवमन्त्रस्तस्यस्वसिद्धिदः ॥ २३१ ॥ तस्मिन्प्रवर्त्ततेसर्व्वसिद्धिःसर्व्वार्थसाधिनी ॥ पादुकाञ्चनवेतालापातालगगनादिकम् ॥ २३२ ॥ विविधायक्षिणीसिद्धिर्व्वाक्सिद्धिस्तस्यजायते ॥ शोषणंसागराणाञ्च धारायाश्रमणन्तथा ॥ ॥ २३३ ॥ नवीनसृष्टिनिर्म्माणं सर्व्वङ्कर्त्तुङ्क्षमोभवेत् ॥ अयुतावर्त्तनेनैव ताराम्पश्यतिचक्षुषा ॥ २३४ ॥ लक्षावर्त्तनमात्रेण तारापतिसमोभवेत् ॥ नकिञ्चिद्दुर्ल्लभन्तस्यजीवन्मुक्तोहि भूतले ॥ २३५ ॥ कल्पान्तेनतुतत्पश्चात्तारासायुज्यमाप्नुयात्॥ यद्धितारासमाविद्या नास्तितारुण्यरूपिणी ॥ २३६ ॥ न चैतत्सदृशंस्तोत्रम्भवेद्ब्रह्माण्डमण्डले ॥ वक्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ॥ २३७ ॥ नशक्यतेफलञ्वक्तुम्मयाकल्पशतैरपि ॥ चुम्बकेनिन्दकेदुष्टेपिशुनेजीवहिंसके ॥ २३८ ॥ सङ्गोप्यं स्तोत्रमेतत्तद्दर्शनेनैवकुत्रचित् ॥ राज्यन्देयन्धनन्देयंशिरोदेयमथापिवा ॥ २३९ ॥ नदेयंस्तोत्रवर्य्यन्तुमन्त्रादपिमहोद्यतम् ॥ अनुलोमविलोमाभ्याम्मूलसम्पुटितन्त्विदम् ॥ २४० ॥ लिखित्वाभूर्ज्जपत्रादौगन्धाष्टकपुरस्सरैः ॥ धारयेद्दक्षिणेवाहौ कण्ठे वामभुजेतथा ॥ २४१ ॥ तस्यसर्व्वार्थसिद्धिस्स्याद्ग्रहिनानैवदह्यते ॥ तद्गात्रंशस्त्रसङ्घैश्चभिद्यतेनकदाचन ॥ २४२ ॥ सभूमिवलयेपुत्र विचरेद्भैरवोपमः ॥वन्ध्यापिलभतेपुत्रन्निर्द्धनोधनमाप्नुयात् ॥ निर्व्विघ्नोलभतेविद्यान्तर्कव्याकरणादिकाम् ॥२४३॥ इतिनिगदितमस्यास्तादिनाम्नांसहस्रञ्वरदमनुनिदानन्दिव्यसाम्राज्यसंज्ञम् ॥ विधिहरिगिरिशादौ शक्तिदानैकदक्षं समविधिपठनीयङ्कालितारासमज्ञैः ॥ २४४ ॥ इतिश्रीब्रह्मयामले तारायास्तकारादिसहस्रनामस्तोत्रंसम्पूर्णम् ॥

इति श्रीतारातन्त्रं समाप्तम् ॥